॥ श्रीः ॥

संस्कृतभाषादीपिका

प्रथमा

श्रीसुरसरस्वतीसभा
भृङ्गगिरिः
१९९२

॥ श्रीः ॥

संस्कृतभाषादीपिका

प्रथमा

श्रीसुरसरस्वतीसभा
शृङ्गगिरिः

ಮುನ್ನುಡಿ

ನಮ್ಮ ದೇಶಭಾಷೆಗಳಿಗೆಲ್ಲ ಮೂಲವೂ ಆದ್ದರಿಂದಲೇ ಶ್ರೇಷ್ಠವೂ ಆದ ಸಂಸ್ಕೃತಭಾಷೆಯನ್ನು ಎಲ್ಲರೂ ಕಲಿಯಲೆಂಬುದು ಶ್ರೀ ಶ್ರೀ ಶೃಂಗೇರಿ ಜಗದ್ಗುರು ಮಹಾಸನ್ನಿಧಾನಂಗಳವರ ಆಶಯವಾಗಿದೆ. ಈ ಉದ್ದೇಶದಿಂದ ಅವರು "ಶ್ರೀಸುರಸರಸ್ವತೀಸಭಾ" ಎಂಬ ಸಂಸ್ಥೆಯನ್ನು ಸ್ಥಾಪಿಸಿ ಪೋಷಿಸುತ್ತಿದ್ದಾರೆ. ಈ ಸಭೆಯು ಸಂಸ್ಕೃತಭಾಷೆಯ ಪ್ರಚಾರಕ್ಕಾಗಿ ತನ್ನದೇ ಆದ ಪರೀಕ್ಷೆಗಳನ್ನು ಏರ್ಪಡಿಸಿ ನಡೆಸುತ್ತ ಬಂದಿದೆ. ಈ ಪರೀಕ್ಷೆಗಳು ತುಂಬ ಜನಪ್ರಿಯವಾಗುತ್ತಿರುವುದನ್ನು ಗಮನಿಸಿ ಇವುಗಳ ಪ್ರಗತಿಗಾಗಿ ಶ್ರೀ ಮಹಾಸನ್ನಿಧಾನಂಗಳವರು ಕೆಳಗೆ ಕಂಡ ವಿದ್ವಾಂಸರನ್ನೊಳಗೊಂಡ ಒಂದು ಪಠ್ಯಪುಸ್ತಕ ಸಮಿತಿಯನ್ನು ನೇಮಿಸಿದರು.

1. ವಿದ್ವಾನ್ ಎನ್. ರಂಗನಾಥಶರ್ಮಾ (ಅಧ್ಯಕ್ಷರು)
2. ವಿದ್ವಾನ್ ಎಸ್. ವಿ. ಶಾಮಭಟ್ಟರು
3. ವಿದ್ವಾನ್ ಬಿ. ಎಸ್. ಕೃಷ್ಣಪ್ಪನವರು
4. ವಿದ್ವಾನ್ ಎಸ್. ಎ. ರಾಮಚಂದ್ರಭಟ್ಟರು

ಈ ಸಮಿತಿಯವರು ಶ್ರಮವಹಿಸಿ ಉತ್ಸಾಹದಿಂದ ಈ ಪುಸ್ತಕವನ್ನು ರಚಿಸಿಕೊಟ್ಟಿದ್ದಾರೆ. ಇದನ್ನು ಅಂದವಾಗಿ ಮುದ್ರಿಸಿಕೊಟ್ಟಿರುವ ಶ್ರೀ ಡಿ.ಎಸ್. ಕೃಷ್ಣಾಚಾರ್ಯರು, ಪ್ರಭಾ ಮುದ್ರಣಾಲಯ, ಬೆಂಗಳೂರು–4 ಅವರಿಗೂ ಧನ್ಯವಾದಗಳನ್ನರ್ಪಿಸುತ್ತೇನೆ.

ಎಸ್. ಜಿ. ಸುಂದರಸ್ವಾಮಿ
ಅಧ್ಯಕ್ಷರು
ಶ್ರೀ ಸುರಸರಸ್ವತೀ ಸಭಾ (ರಿ.), ಶೃಂಗೇರಿ
ಬೆಂಗಳೂರು-560 004

संस्कृतभाषादीपिका

प्रथमा

प्रार्थना

(ಕಂಠಪಾಠ ಮಾಡಿರಿ)

गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः ।
गुरुः साक्षात् परं ब्रह्म तस्मै श्रीगुरवे नमः ॥ १ ॥

वक्रतुण्ड महाकाय कोटिसूर्यसमप्रभ ।
अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥ २ ॥

नमस्ते शारदे देवि काश्मीरपुरवासिनि ।
त्वामहं प्रार्थये नित्यं विद्यां बुद्धिं च देहि मे ॥ ३ ॥

सरस्वति नमस्तुभ्यं वरदे कामरूपिणि ।
विद्यारम्भं करिष्यामि सिद्धिर्भवतु मे सदा ॥ ४ ॥

बुद्धिर्बलं यशो धैर्यं निर्भयत्वं अरोगिता ।
अजाड्यं वाक्पटुत्वं च हनूमत्स्मरणाद्भवेत् ॥ ५ ॥

वर्णमाला

१. स्वराः १३

अ आ इ ई उ ऊ ऋ ॠ ऌ

ए ऐ ओ औ

२. अयोगवाहौ २

(१) अनुस्वारः ं अं

(२) विसर्गः ः अः

३. व्यञ्जनानि ३३

क् ख् ग् घ् ङ्

च् छ् ज् झ् ञ्

ट् ठ् ड् ढ् ण्

त् थ् द् ध् न्

प् फ् ब् भ् म्

य् र् ल् व् श् ष् स् ह्

ಅಕ್ಷರಗಳು

ನಾವು ಕಿವಿಯಿಂದ ಕೇಳುವ ಮತ್ತು ಬಾಯಿಂದ ಉಚ್ಚರಿಸುವ ವರ್ಣಕ್ಕೆ ಅಕ್ಷರವೆಂದು ಹೆಸರು.

ಕೈಯಿಂದ ಬರೆಯುವುದು ಮತ್ತು ಕಣ್ಣಿಂದ ನೋಡಿ ಓದುವುದು ಲಿಪಿ. ಅಕ್ಷರಗಳ ಸಮುದಾಯವೇ ವರ್ಣಮಾಲೆ.

ಸಂಸ್ಕೃತ ಭಾಷೆಯಲ್ಲಿ ನಲವತ್ತೆಂಟು ಅಕ್ಷರಗಳಿವೆ. ಮುಖ್ಯವಾಗಿ ಅವು ಮೂರು ವಿಧ :

स्वरः, व्यञ्जनम्, अयोगवाहौ

ಸ್ವತಂತ್ರವಾಗಿ ಉಚ್ಚರಿಸಬಹುದಾದ ಅಕ್ಷರಗಳಿಗೆ ಸ್ವರಗಳೆಂದು ಹೆಸರು. ಅವು ಎರಡು ವಿಧ :

ह्रस्वस्वराः (पञ्च), दीर्घस्वराः (अष्ट)

ಒಂದು ಮಾತ್ರಾಕಾಲದಲ್ಲಿ ಉಚ್ಚರಿಸಬಹುದಾದ ಸ್ವರಗಳಿಗೆ ಹ್ರಸ್ವಸ್ವರಗಳೆಂದು ಹೆಸರು.

ಉದಾ :—**अ इ उ ऋ ऌ**

ಎರಡು ಮಾತ್ರಾಕಾಲದಲ್ಲಿ ಉಚ್ಚರಿಸಬಹುದಾದ ಸ್ವರಗಳಿಗೆ ದೀರ್ಘಸ್ವರಗಳೆಂದು ಹೆಸರು.

ಉದಾ : **आ ई ऊ ॠ ए ऐ ओ औ**

ಸಂಸ್ಕೃತದಲ್ಲಿ **ए ओ** ಗಳಿಗೆ ಹ್ರಸ್ವವಿಲ್ಲ ; **ऌ** ಕಾರಕ್ಕೆ ದೀರ್ಘವಿಲ್ಲ.

अयोगवाहौ

ಸ್ವರಗಳ ಮತ್ತು ವ್ಯಂಜನಗಳ ಗುಂಪಿಗೆ ಸೇರದೆ, ಸ್ವರದ ಜೊತೆಯಲ್ಲಿಯೇ ಉಚ್ಚರಿಸಬಹುದಾದ ಅಕ್ಷರಗಳಿಗೆ ಅಯೋಗವಾಹಗಳೆಂದು ಹೆಸರು. ಅಯೋಗ ವಾಹಗಳಲ್ಲಿ **अनुस्वार, विसर्ग** ಎಂದು ಎರಡು ವಿಧ.

अनुस्वारः ಉದಾ : अं, इं
विसर्गः ಉದಾ : अः, इः

व्यञ्जनानि

ಸ್ವರಗಳ ಸಹಾಯದಿಂದ ಉಚ್ಚರಿಸಬಹುದಾದ ಅಕ್ಷರಗಳಿಗೆ ವ್ಯಂಜನ ಗಳೆಂದು ಹೆಸರು. ಈ ವ್ಯಂಜನಗಳಿಗೆ ಉಚ್ಚಾರಣೆಯ ಸೌಕರ್ಯಕ್ಕಾಗಿ 'ಅ' ಕಾರವನ್ನು ಸೇರಿಸಲಾಗಿದೆ. ಅವು ಎರಡು ವಿಧ :

वर्गीयव्यञ्जनम्, अवर्गीयव्यञ्जनम्

वर्गीयव्यञ्जनानि २५

क वर्ग	क	ख	ग	घ	ङ
च वर्ग	च	छ	ज	झ	ञ
ट वर्ग	ट	ठ	ड	ढ	ण
त वर्ग	त	थ	द	ध	न
प वर्ग	प	फ	ब	भ	म

अवर्गीयव्यञ्जनानि ८

य र ल व—ಅಂತಸ್ಥ ವರ್ಣಗಳು
श ष स ह—ಊಷ್ಮ ವರ್ಣಗಳು

ವ್ಯಂಜನಕ್ಕೆ ಸ್ವರವನ್ನು ಸೇರಿಸುವುದರಿಂದ ಪೂರ್ಣಾಕ್ಷರವಾಗುತ್ತದೆ :

क्+अ (–) = क

क्+आ (ा) = का

क्+इ (ि) = कि

क्+ई (ी) = की

क्+उ (ु) = कु

क्+ऊ (ू) = कू

क्+ऋ (ृ) = कृ

क्+ॠ (ॄ) = कॄ

क्+ऌ (ॢ) = कॢ

क्+ए (े) = के

क्+ऐ (ै) = कै

क्+ओ (ो) = को

क्+औ (ौ) = कौ

क्+अं (ं) = कं

क्+अः (ः) = कः

ಇದರಂತೆ ಎಲ್ಲ ವ್ಯಂಜನಗಳನ್ನು ಅಭ್ಯಾಸಮಾಡಿರಿ.

द् + ऋ = दृ, र् + उ = रु, र् + ऊ = रू

ಈ ಮೂರನ್ನು ಗಮನಿಸಿರಿ.

संयुक्ताक्षराणि

ಪರಸ್ಪರ ಸೇರಿರುವ ವ್ಯಂಜನಗಳಿಗೆ ಸಂಯುಕ್ತಾಕ್ಷರಗಳೆಂದು ಹೆಸರು. ಈ ಸಂಯುಕ್ತಾಕ್ಷರ (ಒತ್ತಕ್ಷರ) ಗಳನ್ನು ಅಭ್ಯಾಸಮಾಡಿರಿ.

ಉದಾ. :	ग्+य=ग्य,	प्+म=प्म,	त्+म=त्म
	क्+क=क्क,	क्+व=क्व,	प्+त=प्त
	त्+प=त्प,	ङ्+क=ङ्क,	ह्+न=ह्न
	ह्+य=ह्य,	ह्+म=ह्म,	ह्+ण=ह्ण
	द्+य=द्य,	त्+र=त्र,	र्+क=र्क
	क्+ष=क्ष,	ज्+ञ=ज्ञ,	क्+त=क्त
	क्+ल=क्ल,	ष्+ण=ष्ण,	र्+ख=र्ख

ಈ ಶಬ್ದಗಳನ್ನು ಸಂಸ್ಕೃತಲಿಪಿಯಲ್ಲಿ ಬರೆಯಿರಿ :—

ಅಗ್ನಿಃ, ಶಕ್ತಿಃ, ಅಂಕುರವಮ್, ಬ್ರಹ್ಮ, ಮೂರ್ಖಃ, ಪ್ರತ್ಯಕ್ಷಮ್, ಸರ್ವಜ್ಞಃ, ತೃಪ್ತಿಃ, ಬ್ರಾಹ್ಮಣಃ, ಜಾಹ್ನವೀ, ವ್ಯಾಘ್ರಃ, ಸರ್ವತ್ರ, ಸಹ್ಯಾದ್ರಿಃ, ಉತ್ಪಾತಃ, ಕ್ವಾಪಿ, ಶ್ಲೋಕಃ, ವಿದ್ಯಾ, ಲಕ್ಷ್ಮಣಃ, ಶತ್ರುಘ್ನಃ, ಆರೋಗ್ಯಮ್.

कर्कशव्यञ्जनानि=ಪ್ರತಿವರ್ಗದ ಒಂದು ಮತ್ತು ಎರಡನೆಯ ಅಕ್ಷರಗಳು ಮತ್ತು **श ष स** ಗಳು.

मृदुव्यञ्जनानि=ಪ್ರತಿವರ್ಗದ ಕೊನೆಯ ಮೂರು ಅಕ್ಷರಗಳು ಮತ್ತು **य र ल व ह** ಗಳು.

अल्पप्राणाक्षराणि=ಪ್ರತಿವರ್ಗದ ಒಂದು ಮತ್ತು ಮೂರನೆಯ ಅಕ್ಷರಗಳು ಮತ್ತು य र ल व ಗಳು.

महाप्राणाक्षराणि=ಪ್ರತಿವರ್ಗದ ಎರಡು ಮತ್ತು ನಾಲ್ಕನೆಯ ಅಕ್ಷರಗಳು ಮತ್ತು श ष स ह ಗಳು.

अनुनासिकाक्षराणि=ङ ञ ण न म ಗಳು. ಅಕ್ಷರಗಳನ್ನು ಹೇಳುವಾಗ ಕೊನೆಯಲ್ಲಿ कार ಎಂದು ಸೇರಿಸಿಕೊಳ್ಳಬೇಕು. ಉದಾಹರಣೆ— ककार, चकार. रಕಾರವನ್ನು रेफ ಎಂದು ಹೇಳುತ್ತಾರೆ.

ಅಭ್ಯಾಸ

I 1. ಅಕ್ಷರ ಎಂದರೇನು ? ಲಿಪಿ ಎಂದರೇನು ?

2. ಸಂಸ್ಕೃತದಲ್ಲಿ ಅಕ್ಷರಗಳೆಷ್ಟು ?

3. ಸ್ವರ ಎಂದರೇನು ? ಹ್ರಸ್ವಸ್ವರಗಳು ಯಾವುವು ?

4. ಕರ್ಕಶವ್ಯಂಜನಗಳು ಯಾವುವು ?

5. ಅನುನಾಸಿಕಾಕ್ಷರಗಳು ಯಾವುವು ?

6. ಅಯೋಗವಾಹಗಳೆಂದರೇನು ? ಅವು ಯಾವುವು ?

II ಇವುಗಳಲ್ಲಿ ಕರ್ಕಶವ್ಯಂಜನಗಳನ್ನು, ಮೃದುವ್ಯಂಜನಗಳನ್ನು ಮತ್ತು ಅನುನಾಸಿಕಾಕ್ಷರಗಳನ್ನು ಬೇರ್ಪಡಿಸಿ ಬರೆಯಿರಿ :—

ज त ङ ग ख म ह ठ न स प छ ञ थ र

प्रथमः पाठः

॥ श्रीगणेशाय नमः ॥

अयं कः ? गणेशः । अयं गणेशः ।

एषः कः ? बालः । एषः बालः ।

एतौ कौ ? एतौ बालौ । एते के ? एते बालाः ।

सः कः ? गजः । सः गजः ।

तौ कौ ? तौ गजौ । ते के ? ते गजाः ।

अयं कः ? बाणः । अयं बाणः ।

इमौ कौ ? इमौ बाणौ । इमे के ? इमे बाणाः ।

कृष्णः, भीमः, सेवकः, शिक्षकः, छात्रः, हंसः, शुकः, वृषभः, अजः, बिडालः, पर्वतः, रथः, कटः, कवचः, शकटः ।

अभ्यासः

I संस्कृतभाषया उत्तरं लिखत :—

सः कः ? एषः कः ? अयं कः ? इमौ कौ ? तौ कौ ?
एतौ कौ ?: एते के ? इमे के ? ते के ?

II एतानि पदानि वाक्ये योजयत :—

कवचौ, शकटः, बिडालाः

III वाक्यानि पूरयत :—

—— शिक्षकः । —— शुकौ । —— रथाः ।

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमाविभक्तिः	रामः	रामौ	रामाः
	ರಾಮನು	ಇಬ್ಬರು ರಾಮರು	ರಾಮರು

IV ಹೀಗೆಯೇ ಪಾಠದಲ್ಲಿ ಬಂದಿರುವ ನಾಮಪದಗಳ ರೂಪಗಳನ್ನು ಮತ್ತು ಅರ್ಥವನ್ನು ಬರೆಯಿರಿ.

सर्वनाम

ನಾಮಪದಕ್ಕೆ ಬದಲಾಗಿ ಉಪಯೋಗಿಸುವ ಶಬ್ದಕ್ಕೆ ಸರ್ವನಾಮವೆಂದು ಹೆಸರು

ಉದಾಹರಣೆ—सेवकः = ಸೇವಕನು (ನಾಮಪದ) सः = ಅವನು (ಸರ್ವನಾಮ)

सः	तौ	ते
ಅವನು	ಅವರಿಬ್ಬರು	ಅವರೆಲ್ಲರು

V ಹೀಗೆಯೇ ಪಾಠದಲ್ಲಿ ಬಂದಿರುವ ಸರ್ವನಾಮಗಳ ರೂಪಗಳನ್ನು ಅಭ್ಯಾಸಮಾಡಿರಿ.

ಶಬ್ದಾರ್ಥ

छात्रः = ಶಿಷ್ಯ, शुकः = ಗಿಣಿ, अजः = ಆಡು, बिडालः = ಬೆಕ್ಕು, कटः = ಚಾಪೆ, कवचः = ಅಂಗಿ, शकटः = ಗಾಡಿ.

द्वितीयः पाठः

इयं का ? सीता । इयं सीता ।

एषा का ? कन्या । एषा कन्या ।

एते के ? एते कन्ये । एताः काः ? एताः कन्याः ।

सा का ? अजा । सा अजा ।

ते के ? ते अजे । ताः काः ? ताः अजाः ।

इयं का ? शाखा । इयं शाखा ।

इमे के ? इमे शाखे । इमाः काः ? इमाः शाखाः ।

उमा, राधा, वनिता, बालिका, भार्या, चटका, मूषिका, अश्वा, माला, लता, वीणा, नासिका, रसना, मृत्तिका, छाया ।

अभ्यासः

I संस्कृतभाषया उत्तरं लिखत :—

सा का ? एषा का ? इयं का ? इमे के ? ते के ?
एते के ? एताः काः ? इमाः काः ? ताः काः ?

II एतानि पदानि वाक्ये योजयत :—

वनिते, माला, वीणाः ।

III वाक्यानि पूरयत :—

—— बालिका । —— लते । —— भार्याः ।

प्र. वि.	वनिता	वनिते	वनिताः
	ಹೆಂಗಸು	ಇಬ್ಬರು ಹೆಂಗಸರು	ಹೆಂಗಸರು

IV ಹೀಗೆಯೇ ಪಾಠದಲ್ಲಿ ಬಂದಿರುವ ನಾಮಪದಗಳ ರೂಪಗಳನ್ನು ಮತ್ತು ಅರ್ಥವನ್ನು ಬರೆಯಿರಿ.

सा	ते	ताः
ಅವಳು	ಅವರಿಬ್ಬರು	ಅವರೆಲ್ಲರು

V ಹೀಗೆಯೇ ಪಾಠದಲ್ಲಿ ಬಂದಿರುವ ಸರ್ವನಾಮಗಳ ರೂಪಗಳನ್ನು ಅಭ್ಯಾಸಮಾಡಿರಿ.

ಶಬ್ದಾರ್ಥ

शाखा = ಕೊಂಬೆ, भार्या = ಹೆಂಡತಿ, चटका = ಗುಬ್ಬಚ್ಚಿ,
मूषिका = ಇಲಿ, अश्वा = ಹೆಣ್ಣುಕುದುರೆ, नासिका = ಮೂಗು,
रसना = ನಾಲಿಗೆ, मृत्तिका = ಮಣ್ಣು , छाया = ನೆರಳು.

तृतीयः पाठः

इदं किम् ? फलम् । इदं फलम् ।

एतत् किम् ? कमलम् । एतत् कमलम् ।

एते के ? एते कमले । एतानि कानि ? एतानि कमलानि ।

तत् किम् ? मन्दिरम् । तत् विशालं मन्दिरम् ।

ते के ? ते विशाले मन्दिरे । तानि कानि ? तानि विशालानि मन्दिराणि ।

सलिलम्, वनम्, पात्रम्, पर्णम्, गृहम्, कुसुमम्, मुखम्, नेत्रम्, चित्रम्, भूषणम् ।

विशेषणम्

ನಾಮಪದಗಳಲ್ಲಿರುವ ಗುಣ, ಸಂಖ್ಯೆ, ಪರಿಮಾಣ ಮುಂತಾದ ವಿಶೇಷವನ್ನು ತಿಳಿಸುವ ಶಬ್ದಗಳಿಗೆ ವಿಶೇಷಣಗಳೆಂದು ಹೆಸರು. ಇವು ನಾಮಪದದ ಲಿಂಗ, ವಿಭಕ್ತಿ, ವಚನಗಳನ್ನು ಅನುಸರಿಸುತ್ತವೆ

ಉದಾ.—स्थूलः गजः, स्थूलौ गजौ, स्तूलाः गजाः । दीर्घा शाखा, दीर्घे शाखे, दीर्घाः शाखाः । सुन्दरं चित्रम्, सुन्दरे चित्रे, सुन्दराणि चित्राणि ।

पीवर, चपल, कृश, उन्नत, चतुर, धीर—ಈ ವಿಶೇಷಣಗಳನ್ನು ವಾಕ್ಯದಲ್ಲಿ ಉಪಯೋಗಿಸಿ.

अभ्यासः

I संस्कृतभाषया उत्तरं लिखत :—

तत् किम् ? एते के ? इदं किम् ? इमे के ? ते के ?
एते के ? एतानि कानि ? इमानि कानि ? तानि कानि ?

II एतानि पदानि वाक्ये योजयत :—

गृहाणि, नेत्रे, भूषणम् ।

III वाक्यानि पूरयत :—

—— पात्रम् । —— वनानि । —— कुसुमे ।
——बिडालाः । —— कन्ये । —— वृक्षः ।

IV वाक्यदोषान् समीकुरुत :—

इमौ फले । एते बिडालौ । इमे चपलः वानरौ ।
एषः दीर्घा नासिका । इमानि मधुरं फले ।

ಶಬ್ದಾರ್ಥ

सलिलम्=ನೀರು, पर्णम्=ಎಲೆ, मुखम्=ಮುಖ, ಬಾಯಿ,
पीवर=ದಪ್ಪ, चपल=ಚಂಚಲ, कृश=ತೆಳು, उन्नत=ಎತ್ತರ.

चतुर्थः पाठः

त्वं कः ? अहं अध्यापकः ।
अहं कः ? त्वं शिष्यः ।
युवां कौ ? आवां तरुणौ । यूयं के ? वयं वृद्धाः ।
त्वं का ? अहं बालिका ।
अहं का ? त्वं महिला ।
युवां के ? आवां वनिते । यूयं काः ? वयं ललनाः ।

एषः कः ? एषः कुम्भकारः । सः किं करोति ? सः घटं करोति । सः कीदृशं घटं करोति ? सः स्थूलं घटं करोति । सः कया घटं करोति ? सः मृत्तिकया घटं करोति ।

इमौ कौ ? इमौ चित्रकारौ । तौ किं कुरुतः ? तौ सुन्दरे चित्रे लिखतः । तौ कया चित्रं लिखतः ? तौ खटिकया चित्रं लिखतः ।

ते के ? ते मृगाः । ते किं कुर्वन्ति ? ते हरितानि तृणानि खादन्ति । ते कैः तृणानि खादन्ति ? ते मुखैः तृणानि खादन्ति ।

त्वां कः आह्वयति ? मां रमेशः आह्वयति । युवां कौ प्रशंसतः ? आवां उपाध्यायौ प्रशंसतः । युष्मान् के निन्दन्ति ? अस्मान् दुर्जनाः निन्दन्ति ।

त्वया सह कः आगच्छति ? मया सह जनकः आगच्छति । युवाभ्यां साकं के क्रीडन्ति ? आवाभ्यां साकं मित्राणि क्रीडन्ति । युष्माभिः समं काः गायन्ति ? अस्माभिः समं बालिकाः गायन्ति । त्वं कैः सार्धं पठसि ? अहं सतीर्थ्यैः सार्धं पठामि । तेन विना तृणमपि न चलति । दयया विना धर्मः न राजति ।

अभ्यासः

I संस्कृतभाषया उत्तरं लिखत :—

कुम्भकारः किं करोति ? चित्रकारः कया चित्रं लिखति ? कौ युवां प्रशंसतः ? के युष्मान् निन्दन्ति ? त्वं काभ्यां चलसि ? वृषभः कैः चलति ?

II एतानि पदानि वाक्ये योजयत :—

नेत्राभ्याम्, नासिकया, फलानि, रामेण सह ।

III इतरवचने लिखत :—

— — युष्माभिः । मया — — । — आवां — ।
— युवां — । तया — — । — — तैः ।

ಶಬ್ದಾರ್ಥ

त्वम्	युवाम्	यूयम्
ನೀನು	ನೀವಿಬ್ಬರು	ನೀವು
अहम्	आवाम्	वयम्
ನಾನು	ನಾವಿಬ್ಬರು	ನಾವು

*

ललना=ಹೆಂಗಸು, कीदृश=ಎಂತಹ, खटिका=ಸೀಮೆಸುಣ್ಣ, हरित=ಹಸಿರು. तृणम्=ಹುಲ್ಲು, आह्वयति=ಕರೆಯುತ್ತಾನೆ, साकं, सार्धं, समं, सह = ಒಡನೆ, सतीर्थ्यः = ಸಹಪಾಠಿ, विना=ಇಲ್ಲದೆ (ಹೊರತಾಗಿ).

पञ्चमः पाठः

संवादः

दिनेशः—नमस्ते वयस्य ।

महेशः— नमस्तुभ्यं दिनेश ।

दि.—मित्र, कुत्र गच्छसि ?

म.—अहं आपणं गच्छामि । किं त्वमपि आगच्छसि ?

दि.—आम्, अहमपि आगच्छामि । अद्य कः विशेषः ?

म.—श्वः मम जन्मोत्सवः ।

दि.—आपणात् किं किं आनयसि ?

म.—आपणात् फलानि, पुष्पाणि, वस्त्राणि च आहरामि । ममानुजस्य आम्रफलानि प्रियाणि । पश्य, इमानि फलानि आपणिकेन आरामेभ्यः सद्यः एवानीतानि । मम जनकाय एतानि मल्लिकाकुसुमानि अतीव

रुचिराणि । एतानि अपि मालाकारेण पुष्पवाटिकाभ्यः इदानीमेव आनीतानि । इमानि सुगन्धीनि च । मम और्णयः पटः इष्टः । पश्य, एतानि वस्त्राणि विदेशेभ्यः आनीतानीति आपणिकः वदति । एतानि बहुमूल्यानि । अत्र पश्य, एते पटाः स्वदेशीयाः । अधुनैव तन्तुवायगृहात् आनीताः इति कथयति आपणिकः । अल्पमूल्यानीमानि वस्त्राणि । अधुना कानिचित् फलानि, पुष्पाणि, वस्त्राणि च क्रीणामि ।

दि.—मित्र, मम जनकः कार्यालयात् आगच्छति । शीघ्रं गच्छामि ।

म.—बाढम् , इतः गृहं शकटेन गच्छसि उत त्रिचक्रेण ?

दि.—वयस्य, कालः अतीतः । त्रिचक्रेणैव गच्छामि ।

म.—नमस्ते वयस्य, त्वां भोजनाय आह्वयामि । श्वः यथाकालं आगच्छ ।

दि.—भवतु, मित्र, नमस्ते । स्वस्त्यस्तु ।

अभ्यासः

I संस्कृतभाषया उत्तरं लिखत :—

महेशः आपणात् कानि कानि आहरति ? आम्रफलानि केभ्यः आनीतानि ? मल्लिकाकुसुमानि केन आनीतानि ? महेशस्य कीदृशः पटः इष्टः ?

II इतरवचने लिखत :—

अनुजस्य, आपणात्, जनकाय, शकटेन ।

III एतेषु नामपदं, क्रियापदं, अव्ययं च विभाजयत :—

अद्य, आनयसि, अनुजस्य, अतीव, कुसुमानि, वदति, जनकाय, अधुना, गच्छामि ।

IV संयोज्य सन्धिनाम लिखत :—

जन्म+उत्सवः, मम+अनुजस्य, अधुना+एव, आनीतानि+इति, स्वस्ति+इति ।

V वाक्यदोषं समीकुरुत :—

अहं आपणं गच्छसि । मित्र, आपणात् किं किं आनयति ? मम और्णयः पटः इष्टम् ।

VI सम्यक् योजयत :—

पुष्पाणि	आगच्छ
नमः	पटः
और्णयः	आनीतानि
विदेशेभ्यः	तुभ्यम्
भोजनाय	सुगन्धीनि

VII विरुद्धार्थकपदानि लिखत :—

विदेशः, प्रियाणि, गच्छामि, अल्पम् ।

ಶಬ್ದಾರ್ಥ

अनुजः = ತಮ್ಮ, जनकः = ತಂದೆ, आरामः = ತೋಟ,
आपणिकः = ಅಂಗಡಿಯವನು, पुष्पवाटिका = ಹೂದೋಟ,

और्णयपटः=ಉಣ್ಣೆ ಬಟ್ಟೆ, तन्तुवायः=ನೆಯ್ಗೆಯವನು,
यथाकालम्=ಕಾಲಕ್ಕೆ ಸರಿಯಾಗಿ, स्वस्ति=ಮಂಗಳ (ಶುಭ),
इतः=ಇಲ್ಲಿಂದ, उत=ಅಥವಾ, अद्य=ಈ ದಿನ, अधुना=ಈಗ,
पश्य=ನೋಡು, कानिचित्=ಕೆಲವು.

षष्ठः पाठः

शरीरम्

किमिदम् ? इदं शरीरम् । शरीरे शीर्षं प्रधानम् ।
शीर्षे बहूनि मुख्यानि अङ्गानि सन्ति ।
मस्तकस्योपरि केशाः सन्ति ।
सर्वे पुरुषाः, वनिताः च केशान् विविधं संस्कुर्वन्ति ।
वदने पञ्च इन्द्रियाणि सन्ति ।
एका नासिका । घ्राणेन गन्धं जिघ्रामः ।
मुखे रसना, दन्ताः च सन्ति ।
रसनया रसं रसयामः । दन्तैः आहारं चर्वामः ।
द्वौ कर्णौ । कर्णाभ्यां शब्दं आकर्णयामः ।
द्वौ हस्तौ । हस्ताभ्यां कार्यं कुर्मः ।
द्वौ पादौ । पादाभ्यां इतस्ततः सञ्चरामः ।
द्वे नेत्रे । नयनाभ्यां रूपं पश्यामः ।
हस्तैः पादैः विना जीवामः, न तु शीर्षं विना ।
सर्वेषु गात्रेषु शिरः प्रधानम् ।

अभ्यासः

I संस्कृतभाषया उत्तरं लिखत :—

शरीरे किं प्रधानम् ? वदने कानि अङ्गानि सन्ति ?
नयनाभ्यां किं पश्यामः ? दन्तैः किं चर्वामः ?

II वाक्यानि पूरयत :—

—— गन्धं जिघ्रामः । —— रसं रसयामः ।
—— शब्दं आकर्णयामः । —— इतस्ततः सञ्चरामः ।

III एतेषां अन्तं, लिङ्गं, विभक्तिं, वचनं च लिखत :—

अङ्गानि, वनिताः, केशान्, वदने, रसनया, घ्राणेन, कर्णाभ्याम्, नेत्रे, गात्रेषु, दन्तैः ।

IV प्रश्नवाक्यानि कुरुत :—

कर्णाभ्यां शब्दं आकर्णयामः । हस्ताभ्यां कार्यं कुर्मः ।
दन्तैः आहारं चर्वामः । वदने पञ्च इन्द्रियाणि सन्ति ।

V समानार्थकपदानि लिखत :—

वदनम्, शीर्षम्, हस्तौ, पादाभ्याम् ।

ಶಬ್ದಾರ್ಥ

मस्तकम् = ತಲೆ, घ्राणेन = ಮೂಗಿನಿಂದ, चर्वामः = ಅಗಿಯುತ್ತೇವೆ,
रसना = ನಾಲಿಗೆ, उपरि = ಮೇಲೆ, मुखम् = ಮುಖ, ಬಾಯಿ,
इतस्ततः = ಇಲ್ಲಿಂದಲ್ಲಿಗೆ.

सन्धिः

ಅಕ್ಷರಗಳು ಎಡಬಿಡದೆ ಸೇರಿದಾಗ ಸಂಧಿಯೆನಿಸುತ್ತದೆ. ಸ್ವರಾಕ್ಷರಗಳು ಪರಸ್ಪರ ಸೇರಿದಾಗ ಸ್ವರಸಂಧಿಯೆನಿಸುವುದು.

(१) सवर्णदीर्घसन्धिः

ನಿಯಮ :—अ, आ, इ, ई, उ, ऊ, ऋ, ॠ ಈ ಸ್ವರಗಳ ಮುಂದೆ ಸಜಾತೀಯ ಸ್ವರವು ಬಂದರೆ ಅವೆರಡರ ಸ್ಥಾನದಲ್ಲಿ ಸಜಾತೀಯ ದೀರ್ಘಸ್ವರವು ಆದೇಶವಾಗಿ ಬರುತ್ತದೆ.

उदा. :—अ आ+अ आ=आ	देव+आलयः=देवालयः
इ ई+इ ई=ई	हरि+ईशः=हरीशः
उ ऊ+उ ऊ=ऊ	गुरु+उदयः=गुरूदयः
ऋ ॠ+ऋ ॠ=ॠ	मातृ+ऋणम्=मातॄणम्

(२) गुणसन्धिः

ए, ओ, अर् ಈ ಮೂರು ಅಕ್ಷರಗಳಿಗೆ **गुण** ಎಂದು ಹೆಸರು.

ನಿಯಮ :— अ आ ಕಾರಗಳಿಗೆ **इ ई** ಕಾರಗಳು ಪರವಾದರೆ **ए** ಕಾರವೂ, **उ ऊ** ಕಾರಗಳು ಪರವಾದರೆ **ओ** ಕಾರವೂ, **ऋ ॠ** ಕಾರಗಳು ಪರವಾದರೆ **अर्** ಕಾರವೂ ಅವೆರಡರ ಸ್ಥಾನದಲ್ಲಿ ಆದೇಶವಾಗಿ ಬರುತ್ತದೆ.

उदा. :—अ आ+इ ई=ए	गण+ईशः=गणेशः
अ आ+उ ऊ=ओ	गङ्गा+उदकम्=गङ्गोदकम्
अ आ+ऋ ॠ=अर्	देव+ऋषिः=देवर्षिः

(३) वृद्धिसन्धिः

ऐ, औ, आर् ಈ ಮೂರು ಅಕ್ಷರಗಳಿಗೆ **वृद्धि** ಎಂದು ಹೆಸರು.

ನಿಯಮ :—अ आ ಕಾರಗಳಿಗೆ ए ऐ ಕಾರಗಳು ಪರವಾದರೆ ऐ ಕಾರವೂ, ओ औ ಕಾರಗಳು ಪರವಾದರೆ औ ಕಾರವೂ, ಅವೆರಡರ ಸ್ಥಾನದಲ್ಲಿ ಆದೇಶವಾಗಿ ಬರುತ್ತದೆ.

उदा. :—अ आ+ए ऐ=ऐ   सा+एव=सैव

अ आ+ओ औ=औ   वन+ओषधिः=वनौषधिः

अभ्यासः

I संयोज्य सन्धिनाम लिखत :—

मुनि+इन्द्रः, रमा+ईशः, वसन्त+ऋतुः,
दिव्य+औषधम्, एक+एकम् ।

II विगृह्य सन्धिनाम लिखत :—

तथापि, सूर्योदयः, महर्षिः, तेनैव, विद्यारम्भम्,
एकैश्वर्यम्, गिरीशः, गुरूपदेशः ।

सप्तमः पाठः

सुभाषितानि

(ಕಂಠಪಾಠಕ್ಕೆ)

क्षणशः कणशश्चैव विद्यामर्थं च साधयेत् ।
क्षणत्यागे कुतो विद्या कणत्यागे कुतो धनम् ? ॥ १ ॥

जननी जन्मभूमिश्च जाह्नवी च जनार्दनः ।
जनकः पञ्चमश्चैव जकाराः पञ्च दुर्लभाः ॥ २ ॥

धनिकः श्रोत्रियो राजा नदी वैद्यस्तु पञ्चमः ।
पञ्च यत्र न विद्यन्ते न तत्र दिवसं वसेत् ॥ ३ ॥

पिपीलिकार्जितं धान्यं मक्षिकासञ्चितं मधु ।
लुब्धेन सञ्चितं द्रव्यं समूलं हि विनश्यति ॥ ४ ॥

कस्तूरी जायते कस्मात् ? को हन्ति करिणां शतम् ?
किं कुर्यात् कातरो युद्धे ? मृगात् सिंहः पलायनम् ॥ ५ ॥

भोजनान्ते च किं पथ्यम् ? जयन्तः कस्य वै सुतः ?
कथं विष्णुपदं प्रोक्तम् ? तक्रं शक्रस्य दुर्लभम् ॥ ६ ॥

अर्थनाशं मनस्तापं गृहे दुश्चरितानि च ।
वञ्चनं चापमानं च मतिमान् न प्रकाशयेत् ॥ ७ ॥

अभिवादनशीलस्य नित्यं वृद्धोपसेविनः ।
चत्वारि तस्य वर्धन्ते आयुर्विद्यायशोबलम् ॥ ८ ॥

आशायाः ये दासास्ते दासाः सर्वलोकस्य ।
आशा येषां दासी तेषां दासायते लोकः ॥ ९ ॥

स्वगृहे पूज्यते मूर्खः स्वग्रामे पूज्यते प्रभुः ।
स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते ॥ १० ॥

लक्ष्मीर्वसति जिह्वाग्रे जिह्वाग्रे मित्रबान्धवाः ।
जिह्वाग्रे बन्धनं प्राप्तं जिह्वाग्रे मरणं ध्रुवम् ॥ ११ ॥

अकृत्वा परसन्तापं अगत्वा खलनम्रताम् ।
अनुत्सृज्य सतां मार्गं यत्स्वल्पमपि तद्बहु ॥ १२ ॥

ಸೂಚನೆ :—5 ಮತ್ತು 6ನೆಯ ಪದ್ಯದಲ್ಲಿರುವ ಪ್ರಶ್ನೆಗಳಿಗೆ ಆಯಾ ಪದ್ಯದ ಕಡೆಯ ಪಾದದಲ್ಲಿರುವ ಒಂದೊಂದು ಪದವೂ ಕ್ರಮವಾಗಿ ಉತ್ತರ.

अभ्यासः

I संस्कृतभाषया उत्तरं लिखत :—

विद्यां अर्थं च कथं साधयेत् ? कुत्र दिवसं न वसेत् ?
किं किं समूलं विनश्यति ? कातरो युद्धे किं कुर्यात् ?
के सर्वलोकस्य दासाः ? मतिमान् किं किं न प्रकाशयेत् ?
कस्य चत्वारि वर्धन्ते ? तानि कानि ?

II वाक्यानि पूरयत :—

—— पूज्यते मूर्खः । —— वसति जिह्वाग्रे ।
—— पूज्यते राजा । —— मरणं ध्रुवम् ।

ಶಬ್ದಾರ್ಥ

कणशः=ಕಾಳುಕಾಳನ್ನು, जाह्नवी=ಗಂಗೆ, पिपीलिका=ಇರುವೆ, जनकः=ತಂದೆ, मक्षिका=ಜೇನುನೊಣ, कातरः=ಹೇಡಿ, करी=ಆನೆ, लुब्धः=ಆಸೆಬುರುಕ, शक्रः=ಇಂದ್ರ, दरिद्रता=ಬಡತನ, मतिमान्=ಬುದ್ಧಿವಂತ, अभिवादनम्=ನಮಸ್ಕಾರ, दासः=ಸೇವಕ, जिह्वा=ನಾಲಿಗೆ, ध्रुवम्=ನಿಶ್ಚಯ, पलायनम्=ಓಡುವುದು, सञ्चितम्=ಕೂಡಿಟ್ಟ.

अष्टमः पाठः

श्रीरामः

कोसलेषु देशेषु अयोध्या नाम नगरी विख्याता । तं देशं दशरथः नाम भूपालः पालयति स्म । तस्य कौसल्या, सुमित्रा, कैकेयीति तिस्रः भार्याः आसन् । श्रीरामः ज्येष्ठायाः भार्यायाः कौसल्यायाः सुतः । लक्ष्मणशत्रुघ्नौ द्वितीयायाः जायायाः सुमित्रायाः पुत्रौ । भरतः कनिष्ठायाः पत्न्याः कैकेय्याः आत्मजः । तस्यामात्यः सुमन्त्रः ।

श्रीरामः सुगुणः, सुशीलः, सुन्दरः, सर्वजनप्रियः च । तस्य भार्या पतिव्रता सीता । लक्ष्मणः श्रीरामं, शत्रुघ्नः भरतं च छायेव अनुसरतः स्म । तेषां कुमाराणां आचार्यः भगवान् वसिष्ठः । पूज्यस्याचार्यस्य निदेशेन अल्पेनैव कालेन ते सर्वे अपि अतीव प्राज्ञाः सञ्जाताः । श्रीरामाय नमः ।

आपदामपहर्तारं दातारं सर्वसम्पदाम् ।
लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम् ॥

अभ्यासः

I संस्कृतभाषया उत्तरं लिखत :—

दशरथः कः ? तस्य कति भार्याः ? ताः काः ? तस्य कति पुत्राः ? ते के ? श्रीरामः कीदृशः ? तेषां आचार्यः कः ?

II समानार्थकशब्दान् लिखत :—

भार्या, सुतः, भूपालः, अमात्यः ।

III विरुद्धार्थकशब्दं लिखत :—

ज्येष्ठा, प्राज्ञः, सुगुणः, सुन्दरः ।

IV वाक्यानि पूरयत :—

दशरथस्य —भार्याः आसन् । तस्य — पुत्राः आसन् । लक्ष्मणः — शत्रुघ्नः — च छायेव — स्म । तेषां सुतानां — भगवान् वसिष्ठः ।

V सन्धि विगृह्य सन्धिनाम लिखत :—

कैकेयीति, छायेव, अल्पेनैव, तस्यामात्यः ।

ಶಬ್ದಾರ್ಥ

ज्येष्ठा = ಹಿರಿಯುವಳು, द्वितीया = ಎರಡನೆಯುವಳು, अमात्यः = ಮಂತ್ರಿ, आचार्यः = ಗುರು, प्राज्ञः = ಬುದ್ಧಿವಂತ, अतीव = ಬಹಳ, आत्मजः = ಮಗ, आपदः = ಕಷ್ಟಗಳು, अभिरामः = ಮನೋಹರ, भूयः = ಪುನಃ.

ವ್ಯಾಕರಣ ಭಾಗ

ಸಂಸ್ಕೃತಭಾಷೆಯ ಶಬ್ದಗಳಲ್ಲಿ ಮೂರು ವಿಧ

सुबन्तम्, तिङन्तम्, अव्ययम्

सुबन्तम् (नामपदम्)

सुप् ಎಂದರೆ **सु औ जस्** ಮುಂತಾದ ಇಪ್ಪತ್ತೊಂದು ಪ್ರತ್ಯಯಗಳು. ಇವುಗಳೇ ವಿಭಕ್ತಿಪ್ರತ್ಯಯಗಳು. ಇವುಗಳನ್ನು ಪ್ರಾತಿಪದಿಕಗಳಿಗೆ ಸೇರಿಸಿದರೆ ಸುಬಂತಗಳಾಗುತ್ತವೆ. ಧಾತುವನ್ನು ಬಿಟ್ಟು ಅರ್ಥವುಳ್ಳ ಶಬ್ದಕ್ಕೆ '**प्रातिपदिक**' ಎಂದು ಹೆಸರು.

ಉದಾ. :—**राम, तद्, उत्तम, राजपुरुष**

ಈ ವಿಭಕ್ತಿ ಪ್ರತ್ಯಯಗಳ ಪಾತ್ರ ಸಂಸ್ಕೃತ ಭಾಷೆಯಲ್ಲಿ ಹಿರಿದಾದುದು. ಪ್ರತಿಯೊಂದು ಮೂಲಭೂತ ಶಬ್ದದ ಕೊನೆಯ ಅಕ್ಷರವನ್ನು ಗಮನಿಸಿ, ಈ ವಿಭಕ್ತಿಪ್ರತ್ಯಯಗಳನ್ನು ಸೇರಿಸಿದಾಗ ಆಗುವ ವಿಭಿನ್ನರೂಪಗಳನ್ನು ಮನದಟ್ಟು ಮಾಡಿಕೊಳ್ಳಬೇಕು. ಈ ಪಠ್ಯಪುಸ್ತಕದ ಕಡೆಯಲ್ಲಿ ಕೊಟ್ಟಿರುವ ಮಾದರಿಯ ಶಬ್ದಗಳ ವಿಭಕ್ತಿರೂಪಗಳನ್ನು ಕಂಠಪಾಠ ಮಾಡಿಕೊಂಡು, ಅನಂತರ ವಿಭಿನ್ನ ಶಬ್ದಗಳ ವಿಭಕ್ತಿರೂಪಗಳನ್ನು ಊಹಿಸಿ ಪ್ರಯೋಗಿಸಬೇಕು.

ವಿಭಕ್ತಿಗಳು ಏಳು

ವಿಭಕ್ತಿಗಳು	ಏಕವಚನದ ರೂಪ	ಅರ್ಥ	ಕನ್ನಡದ ವಿಭಕ್ತಿಪ್ರತ್ಯಯಗಳು
प्र. वि.	**रामः**	ರಾಮನು	ಉ
सं. प्र. वि.	**हे राम**	ಎಲೈ ರಾಮನೆ,	ಎ
द्वि. वि.	**रामम्**	ರಾಮನನ್ನು	ಅನ್ನು
तृ. वि.	**रामेण**	ರಾಮನಿಂದ	ಇಂದ
च वि.	**रामाय**	ರಾಮನಿಗೆ	ಇಗೆ, ಕ್ಕೆ, ಓಸ್ಕರ
पं वि.	**रामात्**	ರಾಮನ ದೆಸೆಯಿಂದ	ದೆಸೆಯಿಂದ
ष. वि.	**रामस्य**	ರಾಮನ	ಅ
स. वि.	**रामे**	ರಾಮನಲ್ಲಿ	ಅಲ್ಲಿ

ಪ್ರಥಮಾ ವಿಭಕ್ತಿಯು ಕರ್ತರಿ ಪ್ರಯೋಗದಲ್ಲಿ ಕೆಲಸ ಮಾಡುವ ವ್ಯಕ್ತಿಯನ್ನು ಸೂಚಿಸುತ್ತದೆ. ಅದು ವಾಕ್ಯದಲ್ಲಿ ಕರ್ತೃಪದವಾಗಿರುತ್ತದೆ. ಕರ್ತೃಪದದ ಪುರುಷ, ವಚನಗಳನ್ನೇ ಕ್ರಿಯಾಪದವು ಅನುಸರಿಸುತ್ತದೆ.

तिङन्तम् (क्रियापदम्)

ಕೆಲಸವನ್ನು ತಿಳಿಸುವ ಶಬ್ದಕ್ಕೆ ಧಾತು ಎಂದು ಹೆಸರು. ಧಾತುಗಳಿಗೆ तिङ्(ಆಖ್ಯಾತ)ಪ್ರತ್ಯಯಗಳನ್ನು ಸೇರಿಸಿದರೆ तिङन्त ಅಥವಾ ಕ್ರಿಯಾಪದಗಳಾಗುತ್ತವೆ

ಕ್ರಿಯಾಪದಗಳಿಂದ ಕೆಲಸವು ನಡೆದ ಕಾಲ ಮತ್ತು ಆಜ್ಞೆ, ಪ್ರಾರ್ಥನೆ ಮೊದಲಾದುವು ತಿಳಿದುಬರುತ್ತವೆ. ಈ ಪ್ರತ್ಯಯಗಳೇ ಲಕಾರಗಳು. ಈ ಲಕಾರಗಳು ಹತ್ತು ಇವೆ. ಹತ್ತು ಲಕಾರಗಳಲ್ಲಿಯೂ ರೂಪಗಳು ಬೇರೆಬೇರೆಯಾಗುತ್ತವೆ.

लकाराः

लट्=ವರ್ತಮಾನಕಾಲ

लिट्, लङ्, लुङ्=ಭೂತಕಾಲ

लुट्, लृट्=ಭವಿಷ್ಯತ್‌ಕಾಲ

लोट्=ಆಜ್ಞೆ, ವಿಧಿ, ಪ್ರಾರ್ಥನೆ, ಅನುಮತಿ.

विधिलिङ्=ವಿಧಿ ಮುಂತಾದದ್ದು

आशीर्लिङ्=ಆಶೀರ್ವಾದ

लृङ्=ಕ್ರಿಯೆಯ ಅನಿಷ್ಪತ್ತಿ

ಧಾತುಗಳನ್ನು ಹತ್ತು ಗಣಗಳಾಗಿ ವಿಭಾಗಿಸಿದ್ದಾರೆ. ೧, ೪, ೬, ೧೦ನೇ ಗಣಕ್ಕೆ ಸೇರಿದ ಉಪಯುಕ್ತ ಧಾತುಗಳ ರೂಪಗಳನ್ನು ಅಭ್ಯಾಸಮಾಡಿರಿ.

೧ನೇ ಗಣ पठ् ಧಾತು अ ವಿಕರಣ ಪ್ರತ್ಯಯ.

೪ನೇ ಗಣ नृत् ಧಾತು य ವಿಕರಣ ಪ್ರತ್ಯಯ.

೬ನೇ ಗಣ विश् ಧಾತು अ ವಿಕರಣ ಪ್ರತ್ಯಯ.

೧೦ನೇ ಗಣ गण् ಧಾತು अय ವಿಕರಣ ಪ್ರತ್ಯಯ.

धातु+विकरणप्रत्यय+आख्यातप्रत्यय=क्रियापदम्

पठ् + अ+ ति =पठति

ಪುರುಷಗಳು ಮೂರು

ಕೆಲಸ ಮಾಡುವ ವ್ಯಕ್ತಿಯು ನಾನು ಎಂಬುದನ್ನು ಸೂಚಿಸುವುದು उत्तमपुरुषः. ನೀನು ಎಂಬುದನ್ನು ಸೂಚಿಸುವುದು मध्यमपुरुषः. ಉಳಿದ ಎಲ್ಲವೂ प्रथमपुरुषः.

ವಚನಗಳು ಮೂರು

ಕೆಲಸಮಾಡುವ ವ್ಯಕ್ತಿಯು ಒಬ್ಬನಾದರೆ (ಒಂದು ವಸ್ತು, ಪ್ರಾಣಿಯಾದರೆ) एकवचनम् ಇಬ್ಬರಾದರೆ (ಎರಡು ವಸ್ತು, ಪ್ರಾಣಿಗಳಾದರೆ) द्विवचनम्. ಅನೇಕರಾದರೆ बहुवचनम्.

ಆಖ್ಯಾತಪ್ರತ್ಯಯಗಳು ಒಂಭತ್ತು

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	ति	तः	अन्ति
मध्यमपुरुषः	सि	थः	थ
उत्तमपुरुषः	मि	वः	मः

ಧಾತುವಿಗೆ ವಿಕರಣಪ್ರತ್ಯಯವನ್ನು ಸೇರಿಸಿದ ಮೇಲೆ ಈ ಆಖ್ಯಾತ ಪ್ರತ್ಯಯಗಳನ್ನು ಸೇರಿಸಿದಾಗ ಅನೇಕ ಬದಲಾವಣೆಗಳಾಗುವುದನ್ನು ಗಮನಿಸ ಬೇಕು.

ಉದಾ.—	सः पठति	तौ पठतः	ते पठन्ति
	त्वं पठसि	युवां पठथः	यूयं पठथ
	अहं पठामि	आवां पठावः	वयं पठामः

ವಿಶೇಷ ಕ್ರಿಯಾಪದ

अस् धातु—	अस्ति	स्तः	सन्ति
	असि	स्थः	स्थ
	अस्मि	स्वः	स्मः
कृ धातु —	करोति	कुरुतः	कुर्वन्ति
	करोषि	कुरुथः	कुरुथ
	करोमि	कुर्वः	कुर्मः

अव्ययम्

ಲಿಂಗ, ವಚನ, ವಿಭಕ್ತಿಗಳಲ್ಲಿ ಯಾವ ವ್ಯತ್ಯಾಸವನ್ನೂ ಹೊಂದದಿರುವ ಶಬ್ದಗಳಿಗೆ ಅವ್ಯಯಗಳೆಂದು ಹೆಸರು.

ಉದಾ.—च, अपि, बहिः, सर्वदा

अभ्यासः

I मातृभाषया उत्तरं लिखत :—

धातुः कः ? नामपदं किम् ? कति वचनानि ? कानि तानि ? विभक्तयः काः ? लकाराः कति ?

II सोदाहरणं एषां टिप्पणीः लिखत :—

सुबन्तम्, तिङन्तम्, अव्ययम्

III पूरयत :—

दहति — —। — पश्यथः —। — — नयामः।
— — गणयन्ति।

IV योग्य सर्वनामानि पूरयत :—

— सन्ति। — कुरुतः। — अस्मि।
— स्थः। — कुर्मः। — करोति।

V एतेषां इतर पुरुष वचनानि अभ्यस्यत :—

पिबति,	गच्छति,	नमति,	लिखति
यच्छति,	क्रीडति,	खादति,	हसति
सिध्यति,	कुप्यति,	नृत्यति,	अस्यति
चोरयति,	दण्डयति,	ताडयति,	मार्गयति

नवमः पाठः

संवादः

गोविन्दः—नमस्ते वयस्य ।

मुकुन्दः—मित्र, नमस्ते ।

गो.—अद्य कः वासरः ?

मु.—अद्य सौम्यवासरः ।

गो.—ह्यः कः वासरः ?

मु.—ह्यः भौमवासरः ।

गो.—परह्यः कः ?

मु.—परह्यः इन्दुवारः ।

गो.—श्वः कः ?

मु.—श्वः गुरुवारः ।

गो.—परश्वः कः ?

मु.—परश्वः शुक्रवासरः ।

गो.—मित्र, कस्मिन् दिने शालायाः विरामः ?

मु.—सखे, रविवासरे विरामः, स्थिरवासरे अर्धविरामः ।

गो.—वयस्य, कति वासराः ? कथय ।

मु.—मित्र, सप्तवासराः ।

गो.—सखे, देवः कुत्रास्ति ?

मु.—मित्र, देवः पश्चात्–पुरस्तात्, उपरिष्टात्–अधस्तात्, वामतः–दक्षिणतः, अन्तः–बहिः सर्वत्रास्ति । सः सर्वेषु पदार्थेषु, सर्वेषु भूतेषु च सर्वदास्ति ।

गो.—कथं सः अनुभवगोचरः भवति ?

मु.—पश्य, पुरतः अयं कः वृक्षः ?

गो.—मित्र, एषः न्यग्रोधः वृक्षः ।

मु.—अस्यैकं फलमाहर ।

गो.—आहरामि । इदं न्यग्रोधफलम् ।

मु.—एतत् फलं भिन्धि ।

गो.—अये, भिन्नं इदं फलम् ।

मु.—किमत्र पश्यसि ?

गो.—अत्र सूक्ष्माणि बीजानि पश्यामि ।

मु.—एतेषु एकं भिन्धि ।

गो.—मित्र, पश्य, भिन्नं इदं बीजम् ।

मु.—अत्र किं पश्यसि ?

गो.—न किञ्चन पश्यामि । अत्र सूक्ष्माः कणाः सन्ति ।

मु.—सखे, अत्रैव सः महान् वृक्षः अस्ति । सोम्य, श्रद्धत्स्व । एवमेव देवे यदि श्रद्धास्ति तर्हि मन्दं मन्दं निध्यानेन अनुभवविषयो भवति । श्रद्धैव प्रथमं साधनम् ।

अभ्यासः

I संस्कृतभाषया उत्तरं लिखत :—

कति वासराः ? ते के ? न्यग्रोधफले कानि सन्ति ? केन देवः अनुभवविषयो भवति ?

II संयोज्य सन्धिनाम लिखत :—

कुत्र+अस्ति, अस्य+एकम्

III एतेषां पुरुषं, वचनं च लिखत :—

भवति, पश्यसि, आहरामि, सन्ति ।

IV विरुद्धार्थकपदानि वदत :—

बहिः, पुरस्तात्, अस्ति, पुरतः ।

ಶಬ್ದಾರ್ಥ

उपरिष्टात्=ಮೇಲೆ, अन्तः=ಒಳಗೆ, पुरतः=ಮುಂದೆ, आहर=ತೆಗೆದುಕೊಂಡು ಬಾ, न्यग्रोधवृक्षः=ಆಲದಮರ, भिन्धि=ಒಡೆ (ಕತ್ತರಿಸು), श्रद्धत्स्व=ನಂಬು, निध्यानेन=ವಿಮರ್ಶಿಸುವುದರಿಂದ.

दशमः पाठः

१. एकं ब्रह्म ।

२. द्वौ पक्षौ—शुक्लपक्षः, कृष्णपक्षः ।
द्वे अयने—दक्षिणायनम्, उत्तरायणम् ।

३. त्रीणि वचनानि—एकवचनम्, द्विवचनम्, बहुवचनम् ।

४. चत्वारि खाद्यानि—भक्ष्यम्, भोज्यम्, लेह्यम्, चोष्यम् ।

५. पञ्च भूतानि—भूतलम्, जलम्, पावकः, पवनः, आकाशम् ।

६. षड् ऋतवः—वसन्तः, ग्रीष्मः, वर्षः, शरत्, हेमन्तः, शिशिरः ।

७. सप्त ऋषयः—कश्यपः, अत्रिः, भरद्वाजः, विश्वामित्रः, गौतमः, जमदग्निः, वसिष्ठः ।

८. अष्ट दिक्पालकाः—इन्द्रः, अग्निः, यमः, निर्ऋतिः, वरुणः, वायुः, कुबेरः, ईशानः ।

९. नव ग्रहाः—आदित्यः, सोमः, भौमः, सौम्यः, बृहस्पतिः, भार्गवः, मन्दः, राहुः, केतुः ।

१०. दश अवताराः—मत्स्यः, कूर्मः, वराहः, नरसिंहः, वामनः, परशुरामः, श्रीरामः, श्रीकृष्णः, बुद्धः, कल्किः ।

११. एकादश रुद्राः ।

१२. द्वादश राशयः—मेषः, वृषभः, मिथुनम्; कर्काटकः, सिंहः, कन्या, तुला, वृश्चिकः, धनुः, मकरः, कुम्भः, मीनः ।

१५. पञ्चदश तिथयः—प्रतिपत्, द्वितीया, तृतीया, चतुर्थी, पञ्चमी, षष्ठी, सप्तमी, अष्टमी, नवमी, दशमी, एकादशी, द्वादशी, त्रयोदशी, चतुर्दशी, पूर्णिमा । कृष्णपक्षे पञ्चदशी तिथिः अमावास्या ।

२७. सप्तविंशति नक्षत्राणि—अश्विनी, भरणी, कृत्तिका, रोहिणी, मृगशीर्षम्, आर्द्रा, पुनर्वसू, पुष्यः, आश्लेषा, मघा, पूर्वफल्गुनी, उत्तरफल्गुनी, हस्तः, चित्रा, स्वातिः, विशाखा, अनुराधा, ज्येष्ठा, मूलम्, पूर्वाषाढा, उत्तराषाढा, श्रवणः, धनिष्ठा, शततारा, पूर्वाभाद्रा, उत्तराभाद्रा, रेवती ।

अभ्यासः

I संस्कृतभाषया उत्तरं लिखत :—

वचनानि कानि ? पञ्चभूतानि कानि ? षड् ऋतवः के ?
अष्ट दिक्पालकाः के ? नव ग्रहाः के ? दश अवताराः के ?

एकादशः पाठः

स्तोत्राणि

(ಕಂಠಪಾಠಕ್ಕೆ)

कराग्रे वर्तते लक्ष्मीः करमध्ये सरस्वती ।
करमूले स्थिता गौरी प्रभाते करदर्शनम् ॥ १ ॥

उदये ब्रह्मरूपोऽयं मध्याह्ने तु महेश्वरः ।
अस्तमाने स्वयं विष्णुः त्रयीमूर्तिर्दिवाकरः ॥ २ ॥

माता च पार्वती देवी पिता देवो महेश्वरः ।
बान्धवाः शिवभक्ताश्च स्वदेशो भुवनत्रयम् ॥ ३ ॥

भज गोविन्दं भज गोविन्दं गोविन्दं भज मूढमते ।
सम्प्राप्ते सन्निहिते काले नहि नहि रक्षति डुकृञ् करणे ॥ ४ ॥

अधरं मधुरं वदनं मधुरं नयनं मधुरं हसितं मधुरम् ।
हृदयं मधुरं गमनं मधुरं मधुराधिपतेरखिलं मधुरम् ॥ ५ ॥

शब्दरूपाणि

अकारान्तः पुल्लिङ्गः राम शब्दः—ರಾಮನು.

	ए.	द्वि.	ब.
प्र.	रामः	रामौ	रामाः
सं.प्र.	हे राम	हे रामौ	हे रामाः
द्वि.	रामम्	रामौ	रामान्
तृ.	रामेण	रामाभ्याम्	रामैः
च.	रामाय	रामाभ्याम्	रामेभ्यः
पं.	रामात्	रामाभ्याम्	रामेभ्यः
ष.	रामस्य	रामयोः	रामाणाम्
स.	रामे	रामयोः	रामेषु

आकारान्तः स्त्रीलिङ्गः रमा शब्दः—ಲಕ್ಷ್ಮಿ

प्र.	रमा	रमे	रमाः
सं.प्र.	हे रमे	हे रमे	हे रमाः
द्वि.	रमाम्	रमे	रमाः
तृ.	रमया	रमाभ्याम्	रमाभिः
च.	रमायै	रमाभ्याम्	रमाभ्यः
पं.	रमायाः	रमाभ्याम्	रमाभ्यः
ष.	रमायाः	रमयोः	रमाणाम्
स.	रमायाम्	रमयोः	रमासु

अकारान्तः नपुंसकलिङ्गः ज्ञान शब्दः—ತಿಳಿವಳಿಕೆ

प्र.	ज्ञानम्	ज्ञाने	ज्ञानानि
सं.प्र.	हे ज्ञान	हे ज्ञाने	हे ज्ञानानि
द्वि.	ज्ञानम्	ज्ञाने	ज्ञानानि
तृ.	ज्ञानेन	ज्ञानाभ्याम्	ज्ञानैः
च.	ज्ञानाय	ज्ञानाभ्याम्	ज्ञानेभ्यः
पं.	ज्ञानात्	ज्ञानाभ्याम्	ज्ञानेभ्यः
ष.	ज्ञानस्य	ज्ञानयोः	ज्ञानानाम्
स.	ज्ञाने	ज्ञानयोः	ज्ञानेषु

दकारान्तः पुल्लिङ्गः तद् शब्दः—ಅವನು

	ए.	द्वि.	ब.
प्र.	सः	तौ	ते
द्वि.	तम्	तौ	तान्
तृ.	तेन	ताभ्याम्	तैः
च.	तस्मै	ताभ्याम्	तेभ्यः
पं.	तस्मात्	ताभ्याम्	तेभ्यः
ष.	तस्य	तयोः	तेषाम्
स.	तस्मिन्	तयोः	तेषु

दकारान्तः स्त्रीलिङ्गः तद् शब्दः—ಅವಳು

प्र.	सा	ते	ताः
द्वि.	ताम्	ते	ताः
तृ.	तया	ताभ्याम्	ताभिः
च.	तस्यै	ताभ्याम्	ताभ्यः
पं.	तस्याः	ताभ्याम्	ताभ्यः
ष.	तस्याः	तयोः	तासाम्
स.	तस्याम्	तयोः	तासु

दकारान्तः नपुंसकलिङ्गः तद् शब्दः—ಅದು

प्र.	तत्	ते	तानि
द्वि.	तत्	ते	तानि
तृ.	तेन	ताभ्याम्	तैः
च.	तस्मै	ताभ्याम्	तेभ्यः
पं.	तस्मात्	ताभ्याम्	तेभ्यः
ष.	तस्य	तयोः	तेषाम्
स.	तस्मिन्	तयोः	तेषु

दकारान्तः पुल्लिङ्गः एतद् शब्दः—ಇವನು

	ए.	द्वि.	ब.
प्र.	एषः	एतौ	एते
द्वि.	एतम्, एनम्	एतौ, एनौ	एतान्, एनान्
तृ.	एतेन, एनेन	एताभ्याम्	एतैः
च.	एतस्मै	एताभ्याम्	एतेभ्यः
पं.	एतस्मात्	एताभ्याम्	एतेभ्यः
ष.	एतस्य	एतयोः, एनयोः	एतेषाम्
स.	एतस्मिन्	एतयोः, एनयोः	एतेषु

दकारान्तः स्त्रीलिङ्गः एतद् शब्दः—ಇವಳು

	ए.	द्वि.	ब.
प्र.	एषा	एते	एताः
द्वि.	एताम्, एनाम्	एते, एने	एताः, एनाः
तृ.	एतया, एनया	एताभ्याम्	एताभिः
च.	एतस्यै	एताभ्याम्	एताभ्यः
पं.	एतस्याः	एताभ्याम्	एताभ्यः
ष.	एतस्याः	एतयोः, एनयोः	एतासाम्
स.	एतस्याम्	एतयोः, एनयोः	एतासु

दकारान्तः नपुंसकलिङ्गः एतद् शब्दः—ಇದು

	ए.	द्वि.	ब.
प्र.	एतत्	एते	एतानि
द्वि.	एतत्	एते	एतानि

ಉಳಿದ ರೂಪಗಳು ಪುಲ್ಲಿಂಗದಂತೆ

मकारान्तः पुल्लिङ्गः इदम् शब्दः—ಇವನು

	ए.	द्वि.	ब.
प्र.	अयम्	इमौ	इमे
द्वि.	इमम्, एनम्	इमौ, एनौ	इमान्, एनान्
तृ.	अनेन, एनेन	आभ्याम्	एभिः
च.	अस्मै	आभ्याम्	एभ्यः
पं.	अस्मात्	आभ्याम्	एभ्यः
ष.	अस्य	अनयोः, एनयोः	एषाम्
स.	अस्मिन्	अनयोः, एनयोः	एषु

मकारान्तः स्त्रीलिङ्गः इदम् शब्दः—ಇವಳು

प्र.	इयम्	इमे	इमाः
द्वि.	इमाम्, एनाम्	इमे, एने	इमाः, एनाः
तृ.	अनया, एनया	आभ्याम्	आभिः
च.	अस्यै	आभ्याम्	आभ्यः
पं.	अस्याः	आभ्याम्	आभ्यः
ष.	अस्याः	अनयोः, एनयोः	आसाम्
स.	अस्याम्	अनयोः, एनयोः	आसु

मकारान्तः नपुंसकलिङ्गः इदम् शब्दः—ಇದು

प्र.	इदम्	इमे	इमानि
द्वि.	इदम्	इमे	इमानि

ಉಳಿದ ರೂಪಗಳು ಪುಲ್ಲಿಂಗದಂತೆ.

मकारान्तः पुल्लिङ्गः किम् शब्दः—ಯಾವನು

	ए.	द्वि.	बहु.
प्र.	कः	कौ	के
द्वि.	कम्	कौ	कान्
तृ.	केन	काभ्याम्	कैः
च.	कस्मै	काभ्याम्	केभ्यः
पं.	कस्मात्	काभ्याम्	केभ्यः
ष.	कस्य	कयोः	केषाम्
स.	कस्मिन्	कयोः	केषु

मकारान्तः स्त्रीलिङ्गः किम् शब्दः—ಯಾವಳು

प्र.	का	के	काः
द्वि.	काम्	के	काः
तृ.	कया	काभ्याम्	काभिः
च.	कस्यै	काभ्याम्	काभ्यः
पं.	कस्याः	काभ्याम्	काभ्यः
ष.	कस्याः	कयोः	कासाम्
स.	कस्यां	कयोः	कासु

मकारान्तः नपुंसकलिङ्गः किम् शब्दः—ಏನು

प्र	किम्	के	कानि
द्वि.	किम्	के	कानि

ಉಳಿದ ರೂಪಗಳು ಪುಲ್ಲಿಂಗದಂತೆ

दकारान्तः त्रिलिङ्गः युष्मद् शब्दः—ನೀನು.

प्र.	त्वम्	युवाम्	यूयम्
द्वि.	त्वाम्, त्वा	युवाम्, वाम्	युष्मान्, वः
तृ.	त्वया	युवाभ्याम्	युष्माभिः
च.	तुभ्यम्, ते	युवाभ्याम्, वाम्	युष्मभ्यम्, वः
पं.	त्वत्	युवाभ्याम्	युष्मत्
ष.	तव, ते	युवयोः, वाम्	युष्माकम्, वः
स.	त्वयि	युवयोः	युष्मासु

दकारान्तः त्रिलिङ्गः अस्मद् शब्दः—ನಾನು

प्र.	अहम्	आवाम्	वयम्
द्वि.	माम्, मा	आवाम्, नौ	अस्मान्, नः
तृ.	मया	आवाभ्याम्	अस्माभिः
च.	मह्यम्, मे	आवाभ्याम्, नौ	अस्मभ्यम्, नः
पं.	मत्	आवाभ्याम्	अस्मत्
ष.	मम, मे	आवयोः, नौ	अस्माकम्, नः
स.	मयि	आवयोः	अस्मासु

यावदस्ति त्रयी लोके
चतुर्मुख-मुखोद्भवा ।
यावद्वा रामचरितं
वाल्मीकिकविचित्रितम् ॥

क्षरन्त्यमृतधारा वा
यावद्व्यासस्य सूक्तयः ।
वाग्देव्या वरपुत्रस्य
कालिदासस्य वा गिरः ॥

तावदेषा देवभाषा
देवी स्थास्यति भूतले ।
यावच्च वंशोऽस्त्यार्याणां
तावदेषा ध्रुवं ध्रुवा ॥

पुरे ग्रामे गृहे कुट्यां
बालो वृद्धो युवापि च ।
करोतु संस्कृताभ्यासं
प्राप्नोतु सुखसम्पदम् ॥

ಈ ಪುಸ್ತಕವು ದೊರೆಯುವ ಸ್ಥಳ :

ಶ್ರೀ ಸುರಸರಸ್ವತೀ ಸಭಾ
ಶ್ರೀ ಶಂಕರಮಠದ ಆವರಣ
ಶಂಕರಮಠ ರಸ್ತೆ
ಶಂಕರಪುರಂ, ಬೆಂಗಳೂರು - 560 004

ಪ್ರಭಾ ಮುದ್ರಣಾಲಯ, ಬಸವನಗುಡಿ, ಬೆಂಗಳೂರು–೪